# Shri Batukabhairava Hridayastotram

# શ્રીબટુકભૈરવહૃદયસ્તોત્રમ્

## Document Information

Text title : Batukabhairava Hridayam

File name : baTukabhairavahRidayastotram.itx

Category : hRidaya, shiva

Location : doc_shiva

Transliterated by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Proofread by : Gopal Upadhyay, NA

Latest update : November 21, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# શ્રીબટુકભૈરવહૃદયસ્તોત્રમ્

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીઉમામહેશ્વરાભ્યાં નમઃ ॥

॥ શ્રીગુરવે નમઃ ॥

॥ શ્રીભૈરવાય નમઃ ॥

પૂર્વપીઠિકા
કૈલાશશિખરાસીનં દેવદેવં જગદ્ગુરુમ્ ।
દેવી પપ્રચ્છ સર્વજ્ઞં શઙ્કરં વરદં શિવમ્ ॥ ૧॥

॥ શ્રીદેવ્યુવાચ ॥

દેવદેવ પરેશાન ભક્તાભીષ્ટપ્રદાયક ।
પ્રબ્રૂહિ મે મહાભાગ ગોપ્યં યદ્યપિ ન પ્રભો ॥ ૨॥

બટુકસ્યૈવ હૃદયં સાધકાનાં હિતાય ચ ।
॥ શ્રીશિવ ઉવાચ ॥

શ‍ૃણુ દેવિ પ્રવક્ષ્યામિ હૃદયં બટુકસ્ય ચ ॥ ૩॥

ગુહ્યાદ્ગુહ્યતરં ગુહ્યં તચ્છૃણુષ્વ તુ મધ્યમે ।
હૃદયાસ્યાસ્ય દેવેશિ બૃહદારણ્યકો ઋષિઃ ॥ ૪॥

છન્દોઽનુષ્ટુપ્ સમાખ્યાતો દેવતા બટુકઃ સ્મૃતઃ ।
પ્રયોગાભીષ્ટસિદ્ધ્યર્થં વિનિયોગઃ પ્રકીર્તિતઃ ॥ ૫॥

॥ સવિધિ હૃદયસ્તોત્રસ્ય વિનિયોગઃ ॥

ૐ અસ્ય શ્રીબટુકભૈરવહૃદયસ્તોત્રસ્ય શ્રીબૃહદારણ્યક ઋષિઃ ।
અનુષ્ટુપ્ છન્દઃ । શ્રીબટુકભૈરવઃ દેવતા ।
અભીષ્ટસિદ્ધ્યર્થં પાઠે વિનિયોગઃ ॥

॥ અથ ઋષ્યાદિન્યાસઃ ॥

શ્રી બૃહદારણ્યકઋષયે નમઃ શિરસિ ।
અનુષ્ટુપ્છન્દસે નમઃ મુખે ।
શ્રીબટુકભૈરવદેવતાયૈ નમઃ હૃદયે ।
અભીષ્ટસિદ્ધ્યર્થં પાઠે વિનિયોગાય નમઃ સર્વાઙ્ગે ॥

॥ ઇતિ ઋષ્યાદિન્યાસઃ ॥

ૐ પ્રણવેશઃ શિરઃ પાતુ લલાટે પ્રમથાધિપઃ ।
કપોલૌ કામવપુષો ભ્રૂભાગે ભૈરવેશ્વરઃ ॥ ૧॥

નેત્રયોર્વહ્નિનયનો નાસિકાયામઘાપહઃ ।
ઊર્ધ્વોષ્ઠે દીર્ઘનયનો હ્યધરોષ્ઠે ભયાશનઃ ॥ ૨॥

ચિબુકે ભાલનયનો ગણ્ડયોશ્ચન્દ્રશેખરઃ ।
મુખાન્તરે મહાકાલો ભીમાક્ષો મુખમણ્ડલે ॥ ૩॥

ગ્રીવાયાં વીરભદ્રોઽવ્યાદ્ ઘણ્ટિકાયાં મહોદરઃ ।
નીલકણ્ઠો ગણ્ડદેશે જિહ્વાયાં ફણિભૂષણઃ ॥ ૪॥

દશને વજ્રદશનો તાલુકે હ્યમૃતેશ્વરઃ ।
દોર્દણ્ડે વજ્રદણ્ડો મે સ્કન્ધયોઃ સ્કન્દવલ્લભઃ ॥ ૫॥

કૂર્પરે કઞ્જનયનો ફણૌ ફેત્કારિણીપતિઃ ।
અઙ્ગુલીષુ મહાભીમો નખેષુ અઘહાઽવતુ ॥ ૬॥

કક્ષે વ્યાઘ્રાસનો પાતુ કટ્યાં માતઙ્ગચર્મણી ।
કુક્ષૌ કામેશ્વરઃ પાતુ વસ્તિદેશે સ્મરાન્તકઃ ॥ ૭॥

શૂલપાણિર્લિઙ્ગદેશે ગુહ્યે ગુહ્યેશ્વરોઽવતુ ।
જઙ્ઘાયાં વજ્રદમનો જઘને જૃમ્ભકેશ્વરઃ ॥ ૮॥

પાદૌ જ્ઞાનપ્રદઃ પાતુ ધનદશ્ચાઙ્ગુલીષુ ચ ।
દિગ્વાસો રોમકૂપેષુ સન્ધિદેશે સદાશિવઃ ॥ ૯॥

પૂર્વાશાં કામપીઠસ્થઃ ઉડ્ડીશસ્થોઽગ્નિકોણકે ।
યામ્યાં જાલન્ધરસ્થો મે નૈરૃત્યાં કોટિપીઠગઃ ॥ ૧૦॥

વારુણ્યાં વજ્રપીઠસ્થો વાયવ્યાં કુલપીઠગઃ ।
ઉદીચ્યાં વાણપીઠસ્થઃ ઐશાન્યામિન્દુપીઠગઃ ॥ ૧૧॥

ઊર્ધ્વં બીજેન્દ્રપીઠસ્થઃ ખેટસ્થો ભૂતલોઽવતુ ।
રુરુઃ શયાનેઽવતુ માં ચણ્ડો વાદે સદાઽવતુ ॥ ૧૨॥

ગમને તીવ્રનયનઃ આસીને ભૂતવલ્લભઃ ।
યુદ્ધકાલે મહાભીમો ભયકાલે ભવાન્તકઃ ॥ ૧૩॥

રક્ષ રક્ષ પરેશાન ભીમદંષ્ટ્ર ભયાપહ ।
મહાકાલ મહાકાલ રક્ષ માં કાલસઙ્કટાત્ ॥ ૧૪॥

॥ ફલશ્રુતિઃ ॥

ઇતીદં હૃદયં દિવ્યં સર્વપાપપ્રણાશનમ્ ।
સર્વસમ્પત્પ્રદં ભદ્રે સર્વસિદ્ધિફલપ્રદમ્ ॥

॥ ઇતિ શ્રીબટુકભૈરવહૃદયસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Gopal Upadhyay gopal.j.upadhyay at gmail.com, NA

---

*Shri Batukabhairava Hridayastotram*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*